Sl. No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 28

No. of Printed Pages — 7

**P–95–Sanskritam-II**

# प्रवेशिका परीक्षा, 2021

# PRAVESHIKA EXAMINATION, 2021

## संस्कृतम्

## (द्वितीय प्रश्नपत्रम्)

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

यहाँ से काटिए

प्रश्न पुस्तिका को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्य-निर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव लेख्यम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

(5) प्रश्नानाम् अंङ्कभारः निम्नानुसारम् अस्ति ।

| खण्ड | प्रश्नों की संख्या | अंक प्रत्येक प्रश्न | कुल अंक भार |
|---|---|---|---|
| खण्ड - अ (A) | 1 ( i से x ), 2 से 11 = 20 | 1 | 20 |
| खण्ड - ब (B) | 12 से 19 = 8 | 2 | 16 |
| खण्ड - स (C) | 20 से 23 = 4 | 4 | 16 |
| खण्ड - द (D) | 24 से 25 = 2 | 5 | 10 |
| खण्ड - य (E) | 26 से 28 = 3 | 6 | 18 |

## खण्ड - अ (A)

1. अधोलिखित प्रश्नानाम् उत्तराणि उचितक्रमाक्षरेण स्वउत्तरपुस्तिकायां लिखतु – 10 × 1 = 10

(i) ब्रह्मचर्यम् अहिंसा च कीदृशं तपः उच्यते ?

(क) बौद्धिकं तपः (ख) मानसिकं तपः

(ग) शारीरं तपः (घ) वाङ्मयं तपः ।

(ii) सर्वे गुणाः किम् आश्रयन्ते ?

(क) काञ्चनम् (ख) बलम्

(ग) वैदुष्यम् (घ) सम्मानम् ।

(iii) कस्य दण्डकारण्यगमनरूपं वरं कैकेयी याचितवती ?

(क) शत्रुघ्नस्य (ख) भरतस्य

(ग) लक्ष्मणस्य (घ) रामस्य ।

(iv) केषां मैत्री छायेव भवति ?

(क) गुरुशिष्याणाम् (ख) खलसज्जनानाम्

(ग) धीवरमत्स्यानाम् (घ) गोव्याघ्राणाम् ।

(v) राज्ञः वचनाद् रामः कुत्र पतितुं कथयति ?

(क) आकाशे (ख) पावके

(ग) कूपे (घ) नद्याम् ।

(vi) कच्छपस्य नाम आसीत् –

(क) हिरण्यकः (ख) विकटः

(ग) संकटः (घ) कम्बुग्रीवः

(vii) मूषकराजस्य नाम आसीत् –

(क) हिरण्यकः (ख) नागदन्तः

(ग) ताम्रचूडः (घ) लघुपतनकः ।

(viii) कं दृष्ट्वा सिंहसुतौ कुपिताननौ अभूताम् ?

(क) गजम् (ख) मूषकम्

(ग) शृगालम् (घ) सिंहम् ।

(ix) ताम्रचूडः भिक्षापात्रं केन ताडयति स्म ?

(क) हस्तेन (ख) प्रस्तरेण

(ग) जर्जरवंशेन (घ) पादेन ।

(x) सिंहदम्पती प्रतिवसतः स्म –

(क) नगरे (ख) वनप्रदेशे

(ग) जलाशये (घ) प्रासादे ।

प्रश्न संख्या **2** तः **8** पर्यन्तं प्रश्नानाम् उत्तराणि लिखत –

2. अजः नित्यः शाश्वतः च कः अस्ति ? 1

3. मनस्विनः वृत्तिः कस्य इव भवति ? 1

4. रामः नृपस्य प्रतिज्ञाम् अनुपालयन् किं कर्त्तुम् अभिलषति ? 1

5. कच्छपः कुत्र निवसति ? 1

6. महिलारोप्यस्य समीपे कस्य मठायतनम् आसीत् ? 1

7. सिंह्या एकान्ते नीत्वा कः प्रबोधितः ? 1

8. 'पशुपतिः' कः अस्ति ? 1

प्रश्न संख्या **9** तः **11** पर्यन्तं रिक्तस्थानं पूरयित्वा स्वउत्तरपुस्तिकायाम् उत्तरं लिखत :

9. यस्यास्ति .................. स नरः कुलीनः । ( वित्तं / बलं ) 1

10. त्याज्यं न ............ विधुरेऽपि काले । ( लज्जां / धैर्यं ) 1

11. लघुपतनाख्यस्य बायसस्य .............. सह मित्रता भवति । ( मूषकेण / पुरुषेण ) 1

## खण्ड - ब (B)

12. ब्रह्मणः कानिचन चत्वारि नामानि लेख्यानि । 2

13. पार्वत्याः कानिचन चत्वारि नामानि लेख्यानि । 2

14. मालिनी-मन्दाक्रान्तयोः छन्दसोः एकस्य लक्षणं लिखत । 2

15. वसन्ततिलका-शार्दूलविक्रीडतयोः छन्दसोः एकस्य उदाहरणं लिखत । 2

16. निर्देशानुसारं शब्दरूपाणि लिखत – 1 + 1 = 2

(क) बालक वा पति – शब्दस्य, द्वितीयाविभक्ति – एकवचनम् ।

(ख) अस्मद् वा लता – शब्दस्य, – प्रथमाविभक्ति – बहुवचनम् ।

17. निर्देशानुसारं शब्दरूपाणि लिखत – 1 + 1 = 2

(क) युष्मद् वा मधु – शब्दस्य, तृतीयाविभक्ति – एकवचनम् ।

(ख) मातृ वा लता – शब्दस्य, चतुर्थीविभक्ति – द्विवचनम् ।

18. निर्देशानुसारं धातुरूपाणि लिखत – 1 + 1 = 2

(क) अस् वा क्रीड् – धातु – लट्लकार, मध्यमपुरुष – एकवचनम् ।

(ख) कृ वा जि – धातु – लोट्लकार, उत्तमपुरुष – बहुवचनम् ।

19. निर्देशानुसारं धातुरूपाणि लिखत – 1 + 1 = 2

(क) वद् वा धाव् – धातु – लङ्लकार, प्रथमपुरुष – एकवचनम् ।

(ख) क्रीड् वा कृ – धातु – लृट्लकार, प्रथमपुरुष – द्विवचनम् ।

**खण्ड - स (C)**

20. कमप्येकं विषयमवलम्ब्य शतपदेषु निबन्धं लिखत – 4

(क) मम प्रियकविः

(ख) संस्कृत-दिवसः

(ग) श्रीकृष्णः ।

21. भवान् सत्येन्द्रः, राजकीय-प्रवेशिका - संस्कृत - विद्यालय - समीरपुरस्य छात्रः, रुग्णताकारणेन अवकाशाय प्रधानाध्यापकाय प्रार्थनापत्रं लिखतु । 4

**अथवा**

भवान् रामः, भवतः ग्रामस्य विकासाय सरपंच-महोदयस्य कृते प्रार्थनापत्रं लिखतु ।

22. अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसंगं व्याख्या कार्या – 1 + 3 = 4

अथ गच्छता कालेनाऽनावृष्टिवशात्सरः शनैः शनैः शोषमगमत् । ततस्तद्दुःखदुःखितौ तावूचतुः – 'भो मित्र ! जम्बालशेषमेतत्सरः सञ्जातं, तत्कथं भवान् भविष्यतीति व्याकुलत्वं नो हृदि वर्तते । तच्छ्रुत्वा कम्बुग्रीव आह – 'भो ! साम्प्रतं नाऽस्त्यस्माकं जीवितव्यं, जलाऽभावात् ।

**अथवा**

अथ तच्छ्रुत्वा भयत्रस्तमनास्ताम्रचूडस्तमुवाच – 'भो भगवन् ! मैवं वद । न त्वत्समोऽन्यो मम सुहृत्कश्चिदस्ति । परं तच्छ्रूयतां गोष्ठीशैथिल्यकारणम् ।' एष दुरात्मा मूषकः प्रोन्नतस्थाने धृतमपि भिक्षापात्रमुत्प्लुत्यारोहति, भिक्षावशेषञ्च भक्षयति ।

23. अधोलिखितपद्ययोः कस्यचिदेकस्य सप्रसंगं व्याख्या कार्या – 1 + 3 = 4

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।

**अथवा**

न ह्यतो धर्माचरणं किञ्चिदस्ति महत्तरम् ।

यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ।।

**खण्ड - द (D)**

24. कस्यचिदेकस्य अलंकारस्य लक्षणोदाहरणं लिखत – $2\frac{1}{2} + 2\frac{1}{2} = 5$

(क) अनुप्रासः

(ख) विभावना

(ग) रूपकम् ।

25. अधोलिखितपद्ययोः कस्यचिदेकस्य सप्रसंगभावार्थः लेख्यः – 1 + 4 = 5

भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे ।

नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ।।

**अथवा**

सम्पत्सु महतां चित्तं भवेदुत्पलकोमलम् ।

आपत्सु च महाशैल शिला संघात कर्कशम् ।।

**खण्ड - य (E)**

26. अधोलिखितेषु पद्येषु कस्यचिदेकस्य सप्रसंगं व्याख्या कार्या – 1 + 5 = 6

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।।

**अथवा**

श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कंकणेन ।

विभाति कायः करुणाकुलानां, परोपकारेण न चन्दनेन ।।

**अथवा**

पुरा देवासुरे युद्धे पिता ते मम राघव ।

रक्षितेन वरौ दत्तौ सशल्येन महारणे ।।।

27. अधोलिखितेषु गद्येषु कस्यचिदेकस्य सप्रसंगं व्याख्या कार्या – 1 + 5 = 6

तथाऽनुष्ठिते, गच्छता कम्बुग्रीवेणऽधोभागे व्यवस्थितं किञ्चित्पुरमालोकितम् । तत्र ये पौरास्ते तं तथा नीयमानं विलोक्य सविस्मयमिदमूचुः – 'अहो ! चक्राकारं किमपि पक्षिभ्यां नीयते, पश्यत । पश्यत ।

**अथवा**

अथाऽहं तच्छ्रुत्वा कोपाविष्टो भिक्षापात्रमुद्दिश्य विशेषादुत्कूर्दितोऽप्राप्त एव भूमौ निपतितः । तद् दृष्ट्वासौ मे शत्रुर्विहस्य ताम्रचूडमुवाच – भो ! पश्य कौतूहलम् । तत्स्वपिहि त्वं गतशंकः ।

**अथवा**

कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः । तद्यावदेतौ मत्पुत्रौ शिशुत्वात्, त्वां श्रृगालं न जानीतः, तावद् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव । नो चेत् आभ्यां हतो मृत्युपथं समेष्यसि । सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः ।

28. कस्याश्चिदेकस्याः कथायाः सारांशः संस्कृतभाषया लेखनीयः – 6

(क) हिरण्यकताम्रचूडकथा

(ख) सिंहशिशुश्रृगालपुत्रकथा

(ग) काष्ठभ्रष्टकच्छपकथा ।

DO NOT WRITE ANYTHING HERE